# PrAtahsmaranam

# પ્રાતઃસ્મરણમ્

## Document Information

Text title : Pratahsmarana Shlokas 2

File name : prAtaHsmaraNashlokAni.itx

Category : misc, suprabhAta

Location : doc_z_misc_misc

Transliterated by : Paresh Panditrao

Proofread by : Paresh Panditrao

Latest update : October 14, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# પ્રાતઃસ્મરણમ્

અથ પ્રાતઃસ્મરણં -

ૐ શ્રી ગં નમઃ ।

પ્રાતરગ્નિં પ્રાતરિન્દ્રં હવામહે પ્રાતર્મિત્રાવરુણા પ્રાતરશ્વિના ।

પ્રાતર્ભગં પૂષણં બ્રહ્મણસ્પતિં પ્રાતઃ સોમમુત રુદ્રં હુવેમ ॥ ઋગ્વેદ ૭.૦૪૧.૦૧

પ્રાતરગ્નિં પ્રાતરિન્દ્રં હવામહે પ્રાતર્મિત્રાવરુણા પ્રાતરશ્વિના ।

પ્રાતર્ભગં પૂષણં બ્રહ્મણસ્પતિં પ્રાતઃ સોમમુત રુદ્રં હુવેમ ॥ ૧॥

પ્રાતઃસ્મરામિ ભવભીતિમહાર્તિશાન્ત્યૈ
  નારાયણં ગરુડવાહનમબ્જનાભમ્ ।
ગ્રાહાભિભૂત-વર-વારણ-મુક્તિહેતું
  ચક્રાયુધં તરુણ-વારિજ-પત્રનેત્રમ્ ॥ ૨॥

પ્રાતઃ સ્મરામિ ગણનાથમનાથબન્ધું
  સિન્દૂરપૂર્ણ-પરિશોભિત-ગણ્ડયુગ્મમ્ ।
ઉદ્દણ્ડ-વિઘ્ન-પરિખણ્ડનચણ્ડદણ્ડ-
  માખણ્ડલાદિ-સુરનાયક-વૃન્દવન્દ્યમ્ ॥ ૩॥

પ્રાતઃ સ્મરામિ ખલુ તત્સવિતુર્વરેણ્યં
  રૂપં હિ મણ્ડલમૃચોઽથ તનુર્યજૂંષિ ।
સામાનિ યસ્ય કિરણાઃ પ્રભવાદિહેતું
  બ્રહ્મા હરાત્મકમલક્ષ્યમચિન્ત્યરૂપમ્ ॥ ૪॥

પ્રાતઃ સ્મરામિ ભવભીતિહરં સુરેશં
  ગઙ્ગાધરં વૃષભવાહનમમ્બિકેશમ્ ।
ખટ્વાઙ્ગ-શૂલ-વરદાભય-હસ્તમીશં
  સંસારરોગહરમૌષધમદ્વિતીયમ્ ॥ ૫॥

પ્રાતઃ સ્મરામિ શરદિન્દુકરોજ્જ્વલાભાં

સદ્રત્નવન્મકરકુણ્ડલહારશોભામ્ ।
દિવ્યાયુધાર્જિતસુનીલસહસ્રહસ્તાં
રક્તોત્પલાભચરણાં ભવતીં પરેશામ્ ॥ ૬॥

ત્રૈલોક્ય-ચૈતન્ય-મયાદિદેવ !
શ્રીનાથ ! વિષ્ણો ! ભવદાજ્ઞયૈવ ।
પ્રાતઃ સમુત્થાય તવ પ્રિયાર્થં
સંસારયાત્રામનુવર્તયિષ્યે ॥ ૭॥

જાનામિ ધર્મં ન ચ મે પ્રવૃત્તિ
ર્જાનામ્યધર્મં ન ચ મે નિવૃત્તિઃ ।
ત્વયા હૃષીકેશ ! હૃદિ સ્થિતેન
યથા નિયુક્તોઽસ્મિ તથા કરોમિ ॥ ૮॥

સુપ્તઃ પ્રબોધિતો વિષ્ણો હૃષીકેશેન યત્ત્વયા ।
યદ્યત્કારયસે કર્મ તત્કરોમિ તવાજ્ઞયા ॥ ૯॥

અજ્ઞાનતિમિરાન્ધસ્ય જ્ઞાનાઞ્જન-શલાકયા ।
ચક્ષુરુન્મીલિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૦॥

બ્રહ્મા મુરારિસ્ત્રિપુરાન્તકારી
ભાનુઃ શશી ભૂમિસુતો બુધશ્ચ ।
ગુરુશ્ચ શુક્રઃ શનિરાહુકેતવઃ
કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૧૧॥

વૈન્યં પૃથુ હૈહયમર્જુનઞ્ચ
શાકુન્તલેયં ભરતં નલઞ્ચ ।
રામઞ્ચ યો વૈ સ્મરતિ પ્રભાતે
તસ્યાર્થલાભો વિજયશ્ચ હસ્તે ॥ ૧૨॥

શઙ્કરં શઙ્કરાચાર્યં કેશવં બાદરાયણમ્ ।
સૂત્રભાષ્યકૃતૌ વન્દે ભગવન્તૌ પુનઃ પુનઃ ॥ ૧૩॥

માતૃપિતૃસહસ્રાણિ પુત્રદારશતાનિ ચ ।
સંસારેષ્વનુભૂતાનિ યાનિ યાસ્યન્તિ ચાપરે ॥ ૧૪॥

હર્ષસ્થાનસહસ્રાણિ ભયસ્થાનશતાનિ ચ ।
દિવસે દિવસે મૂઢમાવિશન્તિ ન પણ્ડિતમ્ ॥ ૧૫॥

ઊર્ધ્વબાહુર્વિરૌમ્યેષ ન ચ કશ્ચિચ્છ્રણોતિ મે ।
ધર્માદર્થશ્ચ કામશ્ચ સ કિમર્થં ન સેવ્યતે ॥ ૧૬॥

ન જાતુ કામાન્ન ભયાન્ન લોભા
    દ્ધર્મં ત્યજેજ્જીવિતસ્યાપિ હેતોઃ ।
ધર્મો નિત્યઃ સુખદુઃખે ત્વનિત્યે
    જીવો નિત્યો હેતુરસ્ય ત્વનિત્યઃ ॥ ૧૭॥

ઇમાં ભારતસાવિત્રીં પ્રાતરુત્થાય યઃ પઠેત્ ।
સ ભારતફલં પ્રાપ્ય પરં બ્રહ્માધિગચ્છતિ ॥ ૧૮॥

કાર્તવીર્યાર્જુનો નામ રાજા બાહુસહસ્રવાન્ ।
યોઽસ્ય સઙ્કીર્તયેન્નામ કલ્ય ઉત્થાય માનવઃ ॥ ૧૯॥

ન તસ્ય વિત્તનાશઃ સ્યાન્નષ્ટઞ્ચ લભતે પુનઃ ॥

ઇત્યાદિપૌરાણમન્ત્રાન્ પઠિત્વા
ૐ સમુદ્રવસને દેવિ પર્વતસ્તનમણ્ડિતે ।
વિષ્ણુપત્નિ નમસ્તુભ્યં પાદસ્પર્શં ક્ષમસ્વ મે ॥ ( મ. પા. )
ઇતિ પ્રાર્થ્યોત્ત્થાય હસ્તેન સ્પૃષ્ટ્વા શ્વાસાનુસારેણ
ચ ભૂમૌ પાદં દત્ત્વા ગવાદિમઙ્ગલાનિ પશ્યેત્ ।
શ્રોત્રિયં સુભગાં ગાઞ્ચ અગ્નિમગ્નિચિતં તથા ।
પ્રાતરુત્ત્થાય યઃ પશ્યેદાપદ્ભ્યઃ સ પ્રમુચ્યતે ॥ ( ના. દે. )॥

Encoded and proofread by Paresh Panditrao

*PrAtahsmaranam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*